

All-India Kashiraj Trust,
Fort Ramnagar, Varanasi.

Shri Dayal Dalmia,
1 Hansalaya, 11th Floor,
15, Barakhambha Road,
New Delhi.


प्रणवीरः
महाराणा प्रतापः
भारतस्य पश्चिमभागे राजस्थानम् शूर-वीर-राजपुत्राणाम् गृहम् इति उच्यते।


इतिहासः साक्षी अस्ति यत् देशस्य सम्मानार्थम् राजपुत्रैः अनेकानि युद्धानि कृतानि।
एतेषाम् अपि चित्रकूटकानां राजपुत्राणाम् वीरता त्यागयोः कर्माणि सर्वश्रेष्ठानि आसन्।
ख्रीष्टाब्दस्य अष्टम्याम् शताब्द्याम् तैः यवनाक्रमणकारिणाम् दन्ताः त्रोटिताः।


तेषाञ्च स्त्रियोऽपि न कथमपि न्यूना आसन्। चित्रकूटस्य महाराज्ञी कर्मदेवी कुतुबुद्दीनस्य शक्तिशालिनीः सेनाः पराजितवती।


चतुर्दशशताब्द्याम् अलाउद्दीनखिलजीति नामकात् आततायिनः स्वमान-रक्षार्थम् महाराज्ञी पद्मिनी तथा शतशः राजपुत्रमहिलाः आत्मानम् अग्नये निवेदितवत्यः।

SANS


अनन्तरम् चित्रकूटोपरि अधिकारकरणे मुगलाक्रमणकारिणः सफलताम् अलभन्त।


प्रायेण सर्वे महान्तः राजपुत्रशासकाः मुगलानाम् प्रभुत्वम् अंगीकृतवन्तः आसन्। यः न अंगीकृतवान् स आसीत् केवलम् चित्रकूटकः प्रतापः
अहं प्रणं करोमि यत् चित्रकूटार्थम् स्वजीवितम् अपि बलिं करिष्ये।


वयम् अपि व्रतं धारयामः यत् यावत् स्वतन्त्रताम् न प्राप्नुमः तावत् शय्योपरि नहि, भूमौ शयिष्यामः तथा च शोभनानि वस्त्राणि न धारयिष्यामः।
SANS


माता काली भवदुपरि कृपां करोतु, महाराणा! भवता अत्यन्तं कठिनं व्रतं स्वीकृतम् अस्ति।
गुरुदेव! मातृभूमेः रक्षाकरणम् सरलं कार्यम् नास्ति।
...तथा च एतस्मै महते कार्याय यद्यपि बलिदानं कर्तव्यम् तत् स्वल्पम् एव भविष्यति।
यावदस्माकं शिरस्सु रक्तस्य अन्तिमो बिन्दुः अवशिष्यते तावद् वयम् स्वतन्त्रतायै युद्धं करिष्यामः।
साधु, परन्तु अस्माकं कार्यम् अत्यन्तं कठिनम् अस्ति। अस्मदीयाः एव जनाः आक्रमणकारिणाम् सहायताम् कुर्वन्ति।
अस्माभिः स्वकीया शक्तिः वर्धनीया भविष्यति। प्रथमं तावत् कस्मिंश्चिन्महत्त्वपूर्णे दुर्गे अधिकारः करणीयः भविष्यति।

SANS


अतः राणाप्रतापस्य मुष्टिमिताः सैनिकाः चित्रकूटस्य निकटे एकस्मिंश्चिद् दुर्गे आक्रमणं कृतवन्तः यत् मुगलानाम् अधिकारे आसीत्।
हर हर महादेव!
जय चण्डिके!
अन्ततः मुगलसेना पराजिता।
साधु वीराः! दुर्गम् इदानीम् अस्मदीयम् अस्ति।
SANS



एतद् विजयानन्तरम् चित्रकूटस्य अनेके राजपुत्राः दुर्गम् आगत्य महाराणा प्रतापस्य सेनायां सम्मिलिताः अभवन्।
चित्रकूटस्य जनान् उच्यन्ताम् यद् यद्यपि तेषाम् उपरि आक्रमणकारिणाम् शासनम् अस्ति...


...तथापि तेषां वास्तविकः शासकः अहम् अस्मि। मम आज्ञा अस्ति यत् यावद् वयम् स्वतन्त्रतां न प्राप्नुमः तावद् न कोऽपि भूमिकर्षणम् करिष्यति।
SANS


तत्र अकबरस्य सभायाम्-
श्रीमन्! एषः परिहासः अपि श्रुतः? प्रतापः आत्मानं चित्रकूटस्य राजा इति वदति।
सः राजा तु अस्ति- किन्तु विना राज्यम्।
शान्तम्! तत् विस्मर प्रतापः एकम् दुर्गम् जितवान् अस्ति।
किन्तु श्रीमन्! अस्माकम् विशाल-वाहिन्यः अनायासं तं विनाशयिष्यन्ति।
भ्रान्तोऽसि त्वम्। प्रतापस्य दमनं सरलं नास्ति।
SANS


तथा च महाराणा प्रतापस्य दुर्गे-
राणाजि! अयं जनः भूमि-कर्षणम् कुर्वन्नासीत्।
त्वया मम आज्ञायाः अवहेलना कथं कृता ?
मया मुगल-सूबेदारात् आज्ञा प्राप्ता कृता आसीत्।
चित्रकूटस्य शासकः अहम् अस्मि - मया च त्वं न आज्ञप्तः।
तव कृषि शत्रुसेनायाः उदरम् भरिष्यति एवञ्च तस्याः सहायिका भविष्यति।
तव कार्यं मातृभूमेः हितस्य विपरीतम् अस्ति। अतः मृत्यु-दण्डः ते दीयते।
अग्रिमे दिने कृषकस्य मृत्यु-दण्डः दत्तः।


SANS



कृषकस्य मृत्यु-दण्ड-समाचारम् अकबरः श्रुतवान् ।
एतद् अत्यन्तम् अनिष्टम् जातम्। कदाचिद् इदानीम् अपि सः मित्रीकर्तुम् शक्यते।



अकबरः स्वकीयेन राजपुत्रसेनापतिना मानसिंहेन मन्त्रणां कृतवान् ।
प्रतापसदृशेन वीरेण अस्माकं मित्रेण भाव्यम्, राजन् मानसिंह! भवान् गत्वा बोधयतु यत् अस्माकं विरोधे विद्रोहं समाप्तं करोतु।
भवान् साधु वक्ति, श्रीमन्! तस्य मित्रता मुगलसाम्राज्यार्थम् बहुलाभदायिका सिद्धा भविष्यति।
SANS



राजा मानसिंहः महाराणा प्रतापम् मिलितुम्। प्रतापस्य मंत्री स्वागतम् अकरोत्।
आगम्यताम् राजन्!
मया एकः सन्देशः आनीतः। भारतसम्राड् अकबरः राणाजिना मित्रताम् कर्तुम् इच्छति।
सः भवदर्थे सम्राड् भविष्यति, अस्मत्कृत्ये तु आक्रमणकारी अस्ति, शत्रुरस्ति।
सम्राजः विरोधः राजद्रोहः भवति।
नायं राजद्रोहः। स्वतन्त्रतार्थम् युद्धम् अस्माकं परमो धर्मः अस्ति।
परन्तु भवान् एतत् किमर्थम् न अवगच्छति यद् भवान् तस्य विशालां सेनाम् पराजेतुं न शक्नोति।
वयं स्वकर्तव्यम् कुर्मः- जयामः वा पराजिताः भवामः।
SANS


महाराणा प्रतापः स्वपुत्रेण अमरसिंहेन सार्धम् तत्र आगतवान्।
बह्वी वार्ता जाता, मन्त्रिन्। अत्र पुनः विचारम् करिष्यामः। राजा मानसिंहः क्षुधितो भवेत्। यद्यपि रूक्षम्-शुष्कम् अस्मत् पार्श्वे अस्ति तत् प्रस्तूयताम् अमर –
आम् पितः।
किं भवान् अस्माभिः सार्धम् भोजनं न करिष्यति?
नहि, भवान् अस्माकम् अतिथिः अस्ति। प्रथमम् अतिथीनां एव भोजनं कारणीयम्।
परन्तु गृहस्वामिना अपि तेन सह भोजनम् करणीयम्।
हन्त! अहम् भवता सार्धम् भोजनं कर्तुम् न शक्तः।
अस्य कारणं वदिष्यति किम्?
SANS


कारणम् - भवता स्व-
प्रतिष्ठा शत्रोः हस्ते
विक्रीता अस्ति।
अहम् मित्रं भूत्वा आग-
च्छम् - भवताद्य मम अप-
मानः कृतः। भवान् अस्य
फलम् भोक्ष्यति।
साधूक्तम्।
अधुना मिलनम्
युद्धक्षेत्रे
भविष्यति।
मानसिंहः क्रोधाविष्टो भूत्वा प्रतापस्य
दुर्गात् बहिरागतवान्।
स्वपितुः स्वसृपतिम् अक-
बरम् चापि युद्धाय सहैव
आनेष्यति।
मानसिंहस्य
पितृस्वसा
अकबरेण विवा-
हिता आसीत्।
SANS


मानसिंहे गते किञ्चित्कालानन्तरम् प्रताप: मुगलसेनाया: एकस्मिंश्चित् स्कन्धावारे आक्रमणम् अकरोत् अनेका: सैनिकाश्च घातितवान्।


अकबरस्य सभायाम् -
प्रतापेन अस्माकम् समक्षं न कोऽपि विकल्प: कृत:। स: दमनीय: एव भविष्यति।
उचितम् अस्ति- इदम् एव कुरु।
SANS


शीघ्रम् एव मानसिंहः राजकुमारः सलीमश्च विशालसेनाम् आदाय प्रस्थितौ।
प्रतापम् यदि कथमपि दुर्गात् बहिः कर्तुम् शक्येत, तर्हि अस्माकम् कार्यम् सरलं भवेत्।
एतावतीम् बृहतीम् सेनाम् आदाय वयम् तम् पराजेतुं शक्नुमः।
अकबरस्य सेनाः युद्ध-क्षेत्रम् हल्दीघाटीम् प्राप्ताः।
अस्माकम् विकटम् कार्यम् तु इदानीम् प्रारभ्यते।
SANS



तत्र प्रतापस्य दुर्गे-
राणाजि! गुप्तचराः समाचारम् आनीतवन्तः यत् शत्रोः सेनायाम् ८०,००० सैनिकाः सन्ति येषां पार्श्वे अनेकाः शतघ्न्यः भुशुण्ड्यश्च सन्ति।
अस्माकं पार्श्वे च केवलम् २२०००, सैनिकाः सन्ति- भुशुण्ड्यः तु सन्त्येव नहि।


साधु इदम् अभविष्यत् यदि अस्माकं समीपेऽपि अधिकाः सैनिकाः काश्चन भुशुण्डयः आदि अभविष्यन्।

SANS



मानसिंहः अपि महत्त्वपूर्णां सूचनां प्राप्तवान्।
सेनापते! मानसिंह! प्रतापस्य पार्श्वे केवलम् २२००० सैनिकाः सन्ति भुशुण्डी तु एकाऽपि नास्ति।
बहुशोभनः समाचारः अस्ति।
न सैनिकाः सन्ति न वा अस्त्र-शस्त्राणि तथापि मुगलसाम्राज्येन योद्धुम् आगतः। अवश्यम् प्रतापः मूर्खः अस्ति।
मूर्खो नहि, शूर-वीरः! सः यथार्थः राजपुत्रः ...
... मैवम् चिन्तयस्व राजकुमार! विशाला सेना, शोभनानि अस्त्राणि च अवश्यम् युद्धे कार्यम् कुर्वन्ति, परन्तु युद्धाय साहसादृधिकम् नान्यत् किञ्चित् हितकरं वस्तु।

SANS


अस्तु, अमुम् निवादम् परित्यज्य इदानीम् अस्माभिः आक्रमणम् करणीयम्।
न खलु इदानीम्।
न इति कथम्?
यतः प्रतापस्य दुर्गस्य मार्गः तस्याः संकीर्णायाः उपत्यकायाः आभ्यन्तरतः अस्ति अपि च...
...प्रतापस्य सैनिकाः अस्मान् रोद्धुम् तस्याम् प्रतिष्ठिताः सन्ति। अस्माभिः प्रतीक्षा कर्तव्या यस्मात् आक्रमणकरणे ते एव अग्रेसराः भवेयुः।
सुदीर्घप्रतीक्षानन्तरम्-
वयम् एवम् कियत्कालं तिष्ठामः। शीघ्रम् आक्रमणम् करणीयम्।
नहि, राजकुमार सलीम!
श्रीमन्, मया प्रतापस्य दुर्गस्य एकः दीर्घः किन्तु सरलः अन्वेषितः मार्गः अस्ति।

SANS



साधु-साधु। पर्याप्त-सैनिकान् आदाय दुर्गोपरि पृष्ठतः आक्रमणं कुरु।
यथा आज्ञा!
मुगलसेनायाः एकशक्तिशालि भागः प्रतापस्य दुर्गम् रोद्धुम् प्रस्थितः।
महाराणाप्रतापः सेनायाः इमां योजनां ज्ञात्वा चिन्तितः जातः।
अस्मदर्थे दुर्गतिः एव युद्धस्य उपयुक्तम् आसीत् - परन्तु अधुना हल्दीघाटी मध्ये योद्धव्यम् भविष्यति।
ततश्च हल्दीघाटीयुद्धस्थले -
आक्रमणम् कुरु!
SANS



प्रतापः तस्य सैनिकाश्च भीषणम् आक्रमणम् कृतवन्तः।
प्रतापस्य स्वामिभक्तेन घोटकेन चेतकेन अपि न काचित् न्यूनता कृता।
मुगलसेनाया महती क्षतिः जाता।
परन्तु मुगलसेना रणस्थलं त्यक्तुं तत्परा एव आसीत् तावद् अतिरिक्तं सैन्यसाहाय्यम् आगतम्।


तदनन्तरं यत् तुमुलं युद्धं जातम् तत्र महाराणाप्रतापस्य १५,००० सैनिकाः वीरगतिं प्राप्ताः।


युद्धं तथापि प्रवृत्तम् एव आसीत्।
मानसिंहः महाकुशलः सेनापतिः अस्ति। यदि सः हतः स्यात् तस्य सेनायाः मनोबलं नष्टं भविष्यति।


महाराणा प्रतापः सत्वरं मानसिंहम् प्रति अधावत्।



मानसिंहः गजारूढः आसीत् । प्रतापः क्रुद्धसिंह इव तदुपरि आक्रमणम् अकरोत्


प्रतापः भल्लं क्षिप्त्वा प्रहारं कृतवान् किन्तु प्रहारः विफलो जातः। मानसिंहः सुरक्षितः अतिष्ठत्।


एतस्मिन्नन्तरे शत्रुसैनिकाः प्रतापं परिवृतवन्तः ।
तम् आपदि दृष्ट्वा तन्मित्रम् मन्ना तथा चान्येऽपि केचन सैनिकाः तस्य सहायार्थम् अधावन् ।
महाराणा विष्पतः जातः अस्ति। तस्य रक्षा कर्तव्या।
महाराणा प्रतापं रक्षितुं तस्य शिरस्त्राणम् मन्ना निजाशिरसि धृतवान् ।
SANS


मुगलसैनिकाः भ्रान्तिम् गताः। ते प्रतापं मत्वा मन्नोपरि आक्रमणं
कृतवन्तः। मन्ना तैः सह योद्धुं प्रवृत्तः तथा च एतस्मिन्नन्तरे स्वामि-
भक्तघोटकश्चेतकः प्रतापम् आदाय निष्क्रान्तः।
महाराणा अचेतनः आसीत्। तस्य
रक्षार्थम् केचन राजपुत्रसैनिकाः
चेतकेन सार्धम् आगताः।
ते विक्षतं प्रतापं वने एकस्याम्
गुहायाम् आनीतवन्तः।


प्रतापस्तु सुरक्षितो जातः परन्तु तत्कुटुम्बेन महत् खलु दुर्दिनम् दृष्टम्। अनेकानेक-
-दिनानन्तरम् वन्यफलात् कन्दमूलात् च अतिरिक्तं न अन्यत् किञ्चित् खादितुम् उप-
लब्धम् आसीत्।
एकदा तु प्रतापस्य पुत्रः अमरः शुष्काम् रोटिकाम् खादन् आसीत्।
पितः! मार्जारः रोटिकाम् अपहृतवान्।
प्रताप पुत्री स्व रोटिकाम् भ्रात्रे दत्तवती, परन्तु सा बुभुक्षया अचेतना जाता।
इतः अधिकं सहितुं न पार्यते। अहम् अकबरम् पत्रं लिखामि-
कञ्चित्कालानन्तरम् अकबरस्य सभायाम्-
अन्ततः प्रतापः मत्समक्षम् नमितुं स्वीकृतवान्। अयम् उत्सवावसरः अस्ति।
SANS



अकबरस्य सभायाम् एकः राजपुत्रकविः पृथ्वीराजः मनसि प्रतापस्य बहुमानम् करोति स्म। तस्मै इयं वार्ता न अरोचत।
स्वतन्त्रतायाः अन्तिमाशाऽपि नष्टा भवितुं याति मया किञ्चित् करणीयम्।
कविः महाराणाप्रतापम् पत्रं लिखितवान्।
॥ श्रीः ॥ केवलं भवान् एव राजपुत्राणां प्रतिष्ठा-रक्षणे समर्थः। यस्मिन् दिने सूर्यः पश्चिमायाः दिशः उदेष्यति तस्मि-न्नेव भवान् अकबरम् स्वामी इति वक्तुं शक्नोति। —पृथ्वी
कियन्तः प्रेरका इमे शब्दाः। अहं पृथ्वीराजम् लिखामि यत् सूर्यः सर्वदा पूर्वतः एव उदेष्यति। अकबर-सम्मुखम् नाहम् कदापि नमनं करिष्ये।
पृथ्वीराजस्य पत्रतः अनभिज्ञः अकबरः सैनिकानाम् एकं विशालं गुल्मम् वनान्तात् प्रतापम् आनेतुं प्रेषितवान्।
SANS


महाराणाप्रतापः यदा तैः सह चलितुम् अस्वीकृतवान् तदा सैनिकाः तदुपरि आक्रमणम् कृतवन्तः।
एते अस्मदपेक्षया अनेकगुणम् अधिकाः सन्ति।
युद्ध्यध्वम् वीराः।
सर्वे राजपुत्रसैनिकाः वीरगतिं प्राप्तवन्तः प्रतापश्च निगृहीतप्राय एव आसीत् यदा भिल्लैः मुगलानामुपरि सहसा अभियानं कृतम्।


भिल्लाः महाराणाप्रतापम् सपरिवारम् स्ववसतिं नीतवन्तः। स्वसैनिकानाम् विनाशात् प्रतापः अतीव दुःखी आसीत्।
सर्वं समाप्तम्। अहं स्वमातृभूमिं स्वाधीनां कर्तुं न शक्ष्यामि।
राणाजि! हतोत्साहः मा भवतु। त्वयि एव अस्माकम् आशाः स्थिताः सन्ति।
परन्तु सेनां विना अहं मुगलैः सह कथम् युद्धं करिष्ये ?
अहं वनात् स्वजातीयान् एकत्र करिष्ये ततश्च भवान् पुत्रः युद्धम् चालयितुं क्षमो भविष्यति।
परन्तु सेना सज्जीकरणाय धनम् आवश्यकम्! मम पार्श्वे काणवराटिका अपि नास्ति।
एकस्मिन् दिने-
अहम् युष्माकमुपरि भारो भवितुम् न इच्छामि। अहम् इतः अन्यत्र गमिष्यामि।
राणाजि ! न खलु भारभूतो भवान्।
SANS



तदानीम् एव एकः जनः समाचारम् आनीतवान्।
राणाजि। भामाशाह-नामकः कश्चित् सज्जनः भवद्दर्शनाय आगतः अस्ति।
तम् इहैव आनय।
महाराणा श्रुतं मया यत् भवतः धनस्य आवश्यकता अस्ति? मदीया निखिला सम्पत्तिः भवदीया एव।
परन्तु भवताम् निजाम् सम्पत्तिम् अहम् ग्रहीतुम् न शक्नोमि।
भामाशाहः चित्रकूटस्य प्रसिद्धः व्यापारी आसीत्।
देशोपरि संकटे आगते न निजम् किञ्चिद्भवति। इदानीम् तु सर्वस्वम् देशस्य एवास्ति।
तेन विपुलेन धनराशिना प्रतापः भिल्लानाम् शक्तिशालिनीम् सेनाम् सज्जीकृतवान्।
अधुना वयं पुनरपि मुगलैः सह योद्धुम् सन्नद्धाः स्मः।
जय चण्डिके! हर-हर महादेव!


प्रतापः भिल्लसेनाम् आदाय अनेकानि युद्धानि जितवान्।


मुगलेभ्यः फिनसहारादुर्गम् जितवान्।



पुनश्च प्रतापः शीघ्रतापूर्वकम् पार्श्ववर्तिनाम् दुर्गाणाम् उपरि आक्रमणं कृतवान्
यानि मुगलैः अधिकृतानि आसन्।

अन्ते महाराणाप्रतापः देवीर-उदयपुर-कमलमीर-क्षेत्राणि स्वाधीनि कृतवान्।



परन्तु चित्रकूटम् इदानीम् अपि मुगलानाम् अधिकारे आसीत्। प्रतापः विंशतिवर्षेभ्यः निरन्तरम् वीरतापूर्वकम् संघर्षरतः आसीत्। इदानीम् सः गम्भीररूपेण रुग्णः आसीत्।





SANS

महाराणाप्रतापः स्वतन्त्रतायाः अपूर्णेन स्वप्नेन सहैव दिवंगतः। जीवनस्य अन्तिमं क्षणं यावत् सः स्वप्रणम् पालयन् आसीत्। रुग्णोऽपि सः भूमौ एव सुष्वाप न कोमलशय्यायाम्। एवम् च सः भाविनाम् नेतृणाम् कृते इमम् आदर्शम् स्थापयामास यत् देशे संकटग्रस्ते भोगविलासेषु जीवनयापनाय कस्यापि अधिकारः नास्ति।



SAINS

REGISTERED BOOK POST

Printed Book